## Shiv Panchakshar Stotra lyrics

नागेन्द्रहाराय त्रिलोचनाय

भस्माङ्गरागाय महेश्वराय ।

नित्याय शुद्धाय दिगम्बराय

तस्मै न_काराय नमः शिवाय ॥१॥

मन्दाकिनीसलिलचन्दनचर्चिताय

नन्दीश्वरप्रमथनाथमहेश्वराय ।

मन्दारपुष्पबहुपुष्पसुपूजिताय

तस्मै म_काराय नमः शिवाय ॥२॥

शिवाय गौरीवदनाब्जवृन्द_

सूर्याय दक्षाध्वरनाशकाय ।

श्रीनीलकण्ठाय वृषध्वजाय

तस्मै शि_काराय नमः शिवाय ॥३॥

वशिष्ठकुम्भोद्भवगौतमार्य_

मूनीन्द्रदेवार्चितशेखराय ।

चन्द्रार्कवैश्वानरलोचनाय

तस्मै व_काराय नमः शिवाय ॥४॥

यज्ञस्वरूपाय {यक्षस्वरूपाय} जटाधराय

पिनाकहस्ताय सनातनाय ।

दिव्याय देवाय दिगम्बराय

तस्मै य_काराय नमः शिवाय ॥५॥

पञ्चाक्षरमिदं पुण्यं यः पठेच्छिवसंनिधौ ।

शिवलोकमावाप्नोति शिवेन सह मोदते ॥६॥